# shrI rudrANI stotram

# શ્રીરુદ્રાણીસ્તોત્રમ્ અથવા શ્રીરુદ્રશક્તિલાકિનીસ્તોત્રમ્

## Document Information

Text title : rudrANIstotram

File name : rudrANIstotram.itx

Category : devii, ShaTchakrashakti, devI, yoginI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, PSA Easwaran

Description-comments : Rudrayamalatantra paTala 46

Acknowledge-Permission: Muktabodha.org

Latest update : January 7, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરુદ્રાણીસ્તોત્રમ્ અથવા શ્રીરુદ્રશક્તિલાકિનીસ્તોત્રમ્

આનન્દભૈરવી ઉવાચ
શૃણુ ભૈરવ વક્ષ્યામિ રુદ્રાણીસ્તોત્રમુત્તમમ્ ।
શ્રુત્ત્વા પઠિત્ત્વા દેવેશ ધારયિત્ત્વા સ્વદેહકે ॥ ૧॥

મહાસિદ્ધો ભવેદેવ મહાકાલવશો ભવેત્ ।
ત્રૈલોક્યરક્ષણાર્થાય બ્રહ્મણા વિષ્ણુના તથા ॥ ૨॥

રુદ્રયુક્તાં મહારૌદ્રીં સ્તુત્ત્વા સર્વજયો ભવેત્ ।
તચ્છ્રુત્ત્વા મુનયઃ સર્વે યોગિનો યોગદર્શકાઃ ॥ ૩॥

સર્વે દેવાઃ સર્વલોકાધિપાઃ સ્યુઃ પ્રાણરક્ષકાઃ ।
એતત્સ્તવનમાત્રેણ બ્રહ્મા બ્રહ્મત્વમાપ્નુયાત્ ॥ ૪॥

વિષ્ણુર્વિષ્ણુત્વમાપ્નોતિ દેવત્વં સર્વદેવતાઃ ।
ઇદાનીં શૃણુ તત્સ્તોત્રમષ્ટાઙ્ગયોગસાધનમ્ ॥ ૫॥

એતત્સ્તવનપાઠેન ચાષ્ટાઙ્ગકુલદેવતાઃ ।
વશીભૂતાઃ પ્રભવન્તિ સપ્તસ્વર્ગસ્થદેવતાઃ ॥ ૬॥

અસ્ય મહારુદ્રશક્તિસ્તોત્રસ્ય મહાકાલભૈરવઋષિરનુષ્ટુપ્છન્દઃ ।
શ્રીમચ્છ્રીરૂપિણી દેવતા । વાં બીજં દ્રાં શક્તિઃ સમૌં સ્ફેં કીલકમ્ ।
મહોગ્રાદિ દેવતા સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

મહારૌદ્રી રુદ્રારુણારવરવક્રોધનિકરા
  વિકારા ધર્માણાં હરતુ વિષયં દેહિ પરમમ્ ।
વિવેકં સત્પુત્રં ત્વમપિ જગતામાદિપુરુષં
  વિભાકોટિગ્રામસ્ખલનનિચલા લોચનચલા ॥ ૭॥

ત્વમેકા ત્રૈલોક્યં વ્યવસિ સતતં મે શુભભવા
  અનન્તા સા ચાતીન્દ્રિયગણકલા નાગવસના ।
શ્રિયં દાતું નિત્યં સમુદયતિ રશ્મિસ્તવ શિવે

શિવાહ્લાદાનન્દા જડિતમનમન્દા કુરુ મુદા ॥ ૮॥

મહાલોભં પાપં હર હર હરે હીરકનિભે
વિષાનન્દોદ્ભાતા મમ તનુ વિષં વેશવશિનિ ।
સુધાનન્દં દેહિ ક્ષયમપિ હર ક્રોધમતુલં
મદં કામં મોહં કુલજનનિ દિવ્યં વિતર તત્ ॥ ૯॥

તપસ્યાસદ્ભાવં ત્વમપિ ચ દદાસીહ યદિ વા
પ્રદીપ્તા સદ્વ્યાપ્તા ભવતિ તવ દાને મમ મનઃ ।
પ્રફુલ્લાતિશ્રીદે જય મમ ન ભક્તિં નિજશુભાં
સમીડે ત્વામેકાં ભુવનજનરક્ષાં કુરુ સદા ॥ ૧૦॥

વિચાર્યં સ્વે તન્ત્રે રચયસિ સુખં નિત્યમિલિતં
મહાખડ્ગપ્રખ્યા ત્રિભુવનકરા રુદ્રદયિતા ।
સુરાણાં સંરક્ષાં યદિ કુરુ મુદા પીઠનિકરે
મણિદ્વીપે તેજોમયિ હિ મણિપૂરેઽમલપદમ્ ॥ ૧૧॥

મહાક્ષેત્રે યુદ્ધોત્સવભયહરા ત્વં કુલકલા
કિરાતી સર્વાણી મમ કુલગતં પાલય લયે ।
લયજ્ઞાનાનન્દં રચય હૃદયે યોગજનનિ
યતીનાં રક્ષાયૈ કુલયુવતિ વિદ્યે ઉદયતિ ॥ ૧૨॥

પ્રતિષ્ઠા કીર્તિસ્તે ત્વમવતરસિ ત્રાસિ તિમિરા-
ન્ન જાને ત્વત્તત્ત્વં તરુણિ મહિમાનં સુખમયમ્ ।
મહાપારાવારાંનિધિભવજલેશં કુરુ જયં
હિરણ્યાહ્લાદસ્થા ત્વમપિ કરુણાસાગરમયી ॥ ૧૩॥

વિધાતારં વિષ્ણું સુરવરણવન્દીન્ પરજનાન્
પ્રપાસિ ત્વં સિદ્ધા સુખભુવનભઙ્ગક્ષયકરા ।
કિરન્તી સાનન્દા કિરણશતકોટિં ત્રિભુવને
ત્વમેકા કલ્યાણિ ગિરિશરમણિં પાહિ સતતમ્ ॥ ૧૪॥

ત્વદીયં સુખાન્તં સમીચ્છામિ સત્યં
વિસર્ગેન્દુવર્ણાત્મકં કામનાઽઽખ્યમ્ ।
કૃપાદૃષ્ટિપાતા મનઃ પાહિ શુદ્ધા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૫॥

જગત્તારિણી ત્વં જગદ્વ્યાપિની ત્વં
    જગજ્જ્વાલરૂપા જગદ્ધર્મરૂપા ।
અનૈકાન્તિકત્ત્વાત્ત્વમાનન્દરૂપા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૬॥

વિધાનં જનાનાં કુરુ ત્વં ત્વમીશા
    ક્ષપાક્ષામચિત્તા પ્રિયાનન્દદાત્રી ।
ત્વમાજ્ઞામ્બુજસ્થા ત્વમાર્યા ગુરૂણાં
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૭॥

પ્રભામણ્ડલસ્થા સ્થિતિત્યાગસંસ્થા
    સ્થલામ્ભોજમાલા ત્વમાલગ્નકણ્ઠા ।
શિવશ્યામવર્ણા મહાપિઙ્ગલાર્ણા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૮॥

ચતુર્થશ્રુતિસ્થા ચલચ્ચન્દ્રસંસ્થા
    મહાવેદભાષા ત્વમેકા જગત્યામ્ ।
મહાભક્તિભાવાશ્રિતં માં પ્રસિદ્ધે
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૯॥

જગદ્ધામચેષ્ટે જગદ્બુદ્ધિનિષ્ઠે
    જગદ્યૌવનસ્થા જગદ્ભાવસંસ્થા ।
સમાવર્ત્તમધ્યે મહાઘૂર્ણિતં માં
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૦॥

મહા સૃષ્ટિસંહારકાલક્રમસ્થા
    મહામાંસભક્ષા સદાનન્દરૂપા ।
મહાશાક્યમૌનીન્દ્રપૂજ્યે સુરેજ્યે
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૧॥

ચતુઃષષ્ટિતન્ત્રાર્ણવાહ્લાદકત્વા-
    ન્મહાભૌતિકત્વાન્મહાસિદ્ધિવિદ્યા ।
છલચ્છિન્નદેહા છલાનન્નસંજ્ઞા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૨॥

શિવત્વં મહત્ત્વં સમત્વામલત્વા-
    દનૈકાન્તિકત્વં દદાસિ ત્વમાદ્યા ।

સુધાસાગરસ્થા મહામોહનસ્થા ।
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૩॥

મહાસિંહપૃષ્ઠે પદામ્ભોજલક્ષ્મી-
 ર્મમ શ્રીશિરોમણ્ડલસ્થં પ્રપાતુ ।
ભવાનન્દસન્તાનકલ્પેઽવ દેહં
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૪॥

સ્થિરા સા મહાવિદ્યુદાકારહારા
 મહાચઞ્ચલા ચાચલા જ્ઞાનજન્યા ।
સદા ભાવનત્વાત્સદા જ્ઞાપનસ્થા
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૫॥

કુલાનન્દમોહા મહાકૌલકન્યા
 કુલક્ષેત્રરક્ષા કુલચ્છત્રકારા ।
મહાચઞ્ચલત્વાન્મહાવાયુઘૂર્ણા
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૬॥

ચિરઞ્જીવિની ભામિની ભૂમિબીજા
 ભયાભાવહન્ત્રી શરત્કોટિચન્દ્રા ।
વિભૂતિર્ભયાહારકર્ત્રી પ્રકૃષ્ટા
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૭॥

મહાવીરભાવાશ્રયા ભાવરૂપા
 વિશેષાવિશેષે મહાશૈવવીરા ।
વિસર્ગાપવર્ગાશ્રયાર્ણોજ્જ્વલત્ત્વાત્
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૮॥

મહાપઞ્ચમત્વાન્મહામોદકત્વાત્
 મહાકૌલિકાત્વાદસઞ્ચારણત્વાત્ ।
કુલપ્રેમભાવક્રિયાનિશ્ચલત્વાત્
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૯॥

વસોઃ સિદ્ધિદાત્રી શિવાનન્દકર્ત્રી
 મહામૈથુનાનન્દસમ્ભેદનત્વાત્ ।
સુખાશ્વાસતત્ત્વાત્તપઃ પ્રાણરક્ષા
 ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૦॥

ગલત્પ્રેમભાવા કુલજ્ઞાનતત્ત્વાત્
    પ્રિયા શ્રીકૃપાત્વં ભવાધારમૂર્તિઃ ।
મહૈશ્વર્યહેતોર્મહારાજકન્યા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૧॥

મહામોક્ષવિદ્યા મહાનિર્મલત્વાત્
    પ્રભાપઞ્ચચૂડસ્ય સિદ્ધિપ્રિયા ચ ।
મહાનાદબિન્દુપ્રયાસાભિરામા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૨॥

મહાવિદ્રુમાકારવર્ણાભિરામા
    કુલાહ્લાદસૂત્રાદિસંસાધનત્વાત્ ।
મહદ્રાજ્યવિદ્યાધના સઙ્ઘટત્વાત્
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૩॥

તવાઙ્ઘ્રિદ્વયામ્ભોજપૂજાસુખત્વા-
    ન્મહાકાલરૂપા સ્વયં સર્વવિદ્યા ।
વિકારાદિ સમ્બન્ધવિશેષણત્વાત્
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૪॥

શિવત્વં શુભત્વં મહાશૈલકન્યે
    પ્રિયત્વં પરત્વં મહાપાવનત્વમ્ ।
સમાધેહિ તત્ત્વાદનૈકાન્તિકત્વાત્
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૫॥

મહાચેતનાદેવનાદોન નત્વાદ-
    સઙ્ખ્યામતીનાં મનોયોગમુખ્યા ।
વિરોધાપહન્ત્રી રિપુપ્રાણહન્ત્રી
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૬॥

ચતુર્વિંશતિક્રોધતત્ત્વાનુકૂલે
    વિયત્ખણ્ડચન્દ્રોજ્જ્વલે કીલકસ્થે ।
સદા માં પ્રપાતુ પ્રચણ્ડાર્કવર્ણા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૭॥

શુભં કામધેનુસ્વરૂપં સ્વદેહં

સદા દર્શને શ્રદ્ધયા ચારુવર્ણા ।
હિમાંશુપ્રભાકોટિવર્ણેઽત્વપૂર્ણે
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૮॥

મહાકામબીજાન્વિતા ખણ્ડયન્તી
મહાદોષજાલં શનૈરાવહન્તી ।
શિવા ભદ્રકાલી સ્થિરાનન્દમાલા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩૯॥

મહાકાલકૂટાશિનં તીક્ષ્ણનેત્રં
સદા પાહિ શમ્ભું ભયાર્દ્રાતિવેલમ્ ।
ભવાપાલનત્વાદસઙ્ખ્યાનિવાસા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૦॥

હરન્તી વિષાઢ્યં વહન્તી કલાદ્યમ્
રટન્તી નટન્તી વિશાલા ભ્રમન્તી ।
શ્રિયઃ પાલની પાલિકા બાલિકાત્વાત્
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૧॥

ભવાનન્દહેતોઃ સદા શ્રદ્ધયા વા
પદામ્ભોજમધ્યે મનોયોગકાલે ।
પરાસઙ્ખ્યતે કામસઙ્ક્ષાલનત્વાત્
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૨॥

ક્ષિતિક્ષોભનાશાય સિદ્ધાદિવિદ્યા
કુલાઢ્યાખિલાઢ્યાનના સૂક્ષ્મમધ્યા ।
પ્રયત્નં કરોષિ ક્ષયાનન્દદાના
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૩॥

મહાધૈર્યમાહૃત્યજં જપ્યતે યૈ-
સ્તવાદ્યાભિધાનાનિ કાલિપ્રભાતે ।
તદૈવાપિ કાલે દદાસીહ સિદ્ધિં
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૪॥

ચિરં સ્થાપયન્તી ચિરં ભાસયન્તી
ત્વમાખ્યા ગુરૂણાં કુલાનન્દવિદ્યે ।
સ્વધાકારતુષ્ટા કલાવહ્નિજાયા

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૫॥

સુરાનન્દકાલે ફલોદ્ભૂતચિન્હા
ચિતામધ્યદેશે મહાસિદ્ધિદાત્રી ।
ત્રિભિન્ના વિભિન્ના મહારુદ્રવિઘ્ને
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૬॥

મહાપૂર્વિ કાત્યાયનિ ક્રોધમૂલે
વિવેકાદિકં ધર્મમાદૌ દદાસિ ।
ત્રયાણાં સુરાણાં મુદા રક્ષણાય
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૭॥

વિશુદ્ધસ્ફુટત્ત્વાન્મહાકૌતુકત્વા-
ત્તનુધ્યાનમોહાદનન્તે કૃતત્ત્વાત્ ।
કુલારક્ષણાત્મા મહાલક્ષણાત્મા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૮॥

દહન્તી રિપૂણાં કુલગ્ચાત્મદેશં
ક્ષણાદેવ સૂક્ષ્માસુસૂક્ષ્મા સતી સા ।
મમાનન્દદેશં સદા પાલય શ્રી
ત્ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪૯॥

ચતુર્થાશ્રમસ્થાશ્રમં પાહિ રુદ્રે
મહોગ્રપ્રતાપે મહારૌદ્રિ ભદ્રે ।
મહાપાતકાદિક્ષયત્વામૃતત્ત્વા-
ત્ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૦॥

મહાવાયુરમ્યે મહાજ્ઞાનગમ્યે
મહામન્ત્રજાપ્યાદિસિદ્ધિપ્રસિદ્ધે ।
લયં દેહિ બાહ્યાનિલાઘાતનત્વા-
ત્ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૧॥

ન જાનામિ કિં વામરો વાપિ વિષ્ણુ-
ર્મહાકૌલિકો વા ન જાનાતિ પૂજામ્ ।
કુલાધાસનન્તે સુરેન્દ્રાદિપાઠે
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૨॥

મદીયં પ્રલોભ્યં મહાભદ્રકાલિ
    પ્રકાશેન કર્ત્તું સમર્થા ભવ ત્વમ્ ।
પદાબ્જે ચ હન્તું મહાપાપસર્ગે
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૩॥

વહન્તી કપાલં સ્ખલન્તીમપાર્થં
    મહાહેમમાલા મહાકાશયન્તી ।
શિવો મઙ્ગલં મે તુ વૈશ્વાનરીશે
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૪॥

પ્રચણ્ડા પ્રસન્ના ભવક્ષોભહેતો-
    ર્વિવાદાદિઘાતાય શાન્તિઃ પ્રતુષ્ટિઃ ।
કિયત્કાલસંસ્થા પ્રસન્નાન્તરાત્મા
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૫॥

મહાવાયુપાના ક્રિયામોક્ષકાલે
    કુલજ્ઞાનદાના દિવારૂપિણી ત્વમ્ ।
પ્રભુત્વં વિધેહિ ક્ષમે કામકર્ત્રી
    ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫૬॥

યદિ શ્રીવરાદ્યે મમાખ્યા સસિદ્ધિં
    વિદેહીતિ ચિત્તે સમાધાય ભક્તઃ ।
સમાપ્નોતિ શીઘ્રં સદા પ્રાર્થ્યતે યૈઃ
    સદા પઠ્યતે વા મુદા વારમેકમ્ ॥ ૫૭॥

મહાકાલશમ્ભો મહાજ્ઞાનસિદ્ધઃ
    સદા કાલવશ્યે પઠેદેકચિત્તઃ ।
મહાભક્તિભાવં લભેદ્ વેદ મુક્તિં
    મહાદેવભક્તિં ત્રિકાલેન યોગમ્ ॥ ૫૮॥

મણેઃ પીઠમધ્યે મહારુદ્રકાન્તાં
    મહાલાકિનીં કુણ્ડલીં ભાવયન્તી ।
મહાપુણ્યલાભં સ્તવં બ્રહ્મસારં
    મહાકાન્તલાભાય પુણ્યાય સિદ્ધ્યૈ ॥ ૫૯॥

મહાકાલિ રુદ્રાણિ ભદ્રાણિ કૃષ્ણે
    ભવાનન્દમૂર્તિપ્રકાશાય કુર્યાત્ ।

કિલાનન્દમાકૃત્ય સમ્પૂજ્યતે યૈ-
   ર્મહાદેવિ ચણ્ડે તવ ધ્યાનનિષ્ઠા ॥ ૬૦॥

મહામોક્ષભાવં સમાપ્નોતિ શીઘ્રં
   મહાશુદ્ધતા કામહા કાલરૂપી ॥ ૬૧॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધિમન્ત્રપ્રકરણે
ષટ્ચક્રપ્રકાશે મણિપૂરભેદનક્રમે ભૈરવીભૈરવસંવાદે
રુદ્રશક્તિલાકિનીસ્તોત્રં નામ ષટ્ચત્ત્વારિંશઃ પટલઃ ॥ ૪૬॥

Muktabodha Library
Proofread by PSA Easwaran

*shrI rudrANI stotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*